# Striguru Dhyanam Stuti Kavacha and Gita from various tantras

# સ્ત્રીગુરુ ધ્યાનસ્તુતીકવચં ગીતા વિવિધ તન્ત્રે

## Document Information

Text title : strIguru dhyAna stutiH kavachaM gItA vividha tantre

File name : strIgurustutikavachagItA.itx

Category : kavacha, deities_misc, gurudev

Location : doc_deities_misc

Transliterated by : http://muktalib5.org

Proofread by : http://muktalib5.org, DPD

Description-comments : strIgurudhyAnaM guptasAdhanatantre dvitIyapaTale

Latest update : August 16, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

# સ્ત્રીગુરુ ધ્યાનસ્તુતીકવચં ગીતા વિવિધ તન્ત્રે

॥ અથ સ્ત્રીગુરુધ્યાનં ગુપ્તસાધનતન્ત્રે દ્વિતીયપટલે ॥

પાર્વત્યુવાચ ॥
ગુરુધ્યાનં શ્રુતં નાથ ! સર્વતન્ત્રેષુ ગોપિતમ્ ।
સ્ત્રિયા દીક્ષા શુભા પ્રોક્તા સર્વકામફલપ્રદા ॥ ૧॥

બહુજન્માર્જિતાત્ પુણ્યાત્ બહુભાગ્યવશાદ્ યદિ ।
સ્ત્રીગુરુર્લભ્યતે નાથ ! તસ્યા ધ્યાનન્તુ કીદૃશમ્ ॥ ૨॥
કુત્ર વા સા ગુરુર્ધ્યેયા શ્રોતુમિચ્છામિ સામ્પ્રતમ્ ।
કથયસ્વ મહાદેવ ! યદ્યહં તવ વલ્લભા ॥ ૩॥

શિવ ઉવાચ ॥
શ‍ૃણુ પાર્વતિ ! વક્ષ્યામિ તવ સ્નેહપરિપ્લુતઃ ।
રહસ્યં સ્ત્રીગુરોર્ધ્યાનં યથા ધ્યેયા ચ સા ગુરુઃ ॥ ૪॥
સહસ્રારે મહાપદ્મે કિઞ્જલ્કગણશોભિતે ।
પ્રફુલ્લપદ્મપત્રાક્ષી ઘનપીનપયોધરા ॥ ૫॥
પ્રસન્નવદના ક્ષીણમધ્યા ધ્યાયેચ્છિવાં ગુરુમ્ ।
પદ્મરાગસમાભાસાં રક્તવસ્ત્રસુશોભનામ્ ॥ ૬॥
રક્તકઙ્કણપાણિઞ્ચ રક્તનૂપુરશોભિતામ્ ।
શરદિન્દુપ્રતીકાશાં રક્તોદ્ભાસિતકુણ્ડલામ્ ॥ ૭॥
સ્વનાથવામભાગસ્થાં વરાભયકરામ્બુજામ્ ।
ઇતિ તે કથિતં દેવિ ! સ્ત્રીગુરોર્ધ્યાનમુત્તમમ્ ।
ગોપનીયં પ્રયત્નેન ન પ્રકાશ્યં કદાચન ॥ ૮॥

---

અથ સ્તુતિઃ ॥ માતૃકાભેદતન્ત્રે સપ્તપટલે ॥

દેવ્યુવાચ ॥
સ્તુતિઞ્ચ કવચં નાથ ! શ્રોતુમિચ્છામિ સામ્પ્રતમ્ ।

શ્રીગુરોઃ કવચં પ્રોક્તં ત્વયા નાથ ! પુરા પ્રભો ! ॥ ૧॥
ઇદાનીં સ્ત્રીગુરોઃ સ્ત્રોત્રં કવચં મયિ કથ્યતામ્ ।
યસ્ય વિજ્ઞાનમાત્રેણ પુનર્જન્મ ન જાયતે ॥ ૨॥

શ્રીશિવ ઉવાચ ॥

શૃણુ દેવિ ! પ્રવક્ષ્યામિ સ્તોત્રં પરમગોપનમ્ ।
યસ્ય શ્રવણમાત્રેણ સંસારાન્મુચ્યતે નરઃ ॥ ૧॥

નમસ્તે દેવદેવેશિ ! નમસ્તે હરપૂજિતે ! ।
બ્રહ્મવિદ્યાસ્વરૂપાયૈ તસ્યૈ નિત્યં નમો નમઃ ॥ ૨॥
અજ્ઞાનતિમિરાન્ધસ્ય જ્ઞાનાઞ્જનશલાકયા ।
યયા ચક્ષુરુન્મીલિતં તસ્યૈ નિત્યં નમો નમઃ ॥ ૩॥
ભવબન્ધનપારસ્ય તારિણી જનની પરા ।
જ્ઞાનદા મોક્ષદા નિત્યં તસ્યૈ નિત્યં નમો નમઃ ॥ ૪॥
શ્રીનાથવામભાગસ્થા સદયા સુરપૂજિતા ।
સદા વિજ્ઞાનદાત્રી ચ તસ્યૈ નિત્યં નમો નમઃ ॥ ૫॥
સહસ્રારે મહાપદ્મે સદાનન્દસ્વરૂપિણી ।
મહામોક્ષપ્રદા દેવી તસ્યૈ નિત્યં નમો નમઃ ॥ ૬॥
બ્રહ્મવિષ્ણુસ્વરૂપા ચ મહારુદ્રસ્વરૂપિણી ।
ત્રિગુણાત્મસ્વરૂપા ચ તસ્યૈ નિત્યં નમો નમઃ ॥ ૭॥
ચન્દ્રસૂર્ય્યાગ્નિરૂપા ચ મદાઘૂર્ણિતલોચના ।
સ્વનાથઞ્ચ સમાલિઙ્ગ્ય તસ્યૈ નિત્યં નમો નમઃ ॥ ૮॥
બ્રહ્મવિષ્ણુશિવત્વાદિજીવન્મુક્તિપ્રદાયિની ।
જ્ઞાનવિજ્ઞાનયોર્દાત્રી તસ્યૈ શ્રીગુરવે નમઃ ॥ ૯॥
ઇદં સ્તોત્રં મહેશાનિ ! યઃ પઠેદ્ભક્તિસંયુતઃ ।
સ સિદ્ધિં લભતે નિત્યં સત્યં સત્યં ન સંશયઃ ॥ ૧૦॥

પ્રાતઃકાલે પઠેદ્ યસ્તુ ગુરુપૂજાપુરઃસરમ્ ।
સ એવ ધન્યો લોકેશો દેવીપુત્ર ઇવ ક્ષિતૌ ।
ઇતિ માતૃકાભેદતન્ત્રે સ્ત્રીગુરોઃ સ્તોત્રં સમ્પૂર્ણમ્ ॥ ૧૧॥

---

સ્તોત્રં સમાપ્તં દેવેશિ ! કવચં શૃણુ સાદરમ્ ।
યસ્ય સ્મરણમાત્રેણ વાગીશસમતાં વ્રજેત્ ।

॥ સ્ત્રીગુરુકવચમ્ ॥

વિનિયોગઃ -

સ્ત્રીગુરોઃ કવચસ્યાસ્ય સદાશિવ ઋષિઃ સ્મૃતઃ ।
તારાખ્યા દેવતા ખ્યાતા ચતુર્વર્ગફલપ્રદા ॥ ૧॥

ક્લીં બીજં ચક્ષુષોર્મધ્યે સર્વાઙ્ગં મે સદાવતુ ।
ઐં બીજં મે મુખં પાતુ હ્રીં જિહ્વાં પરિરક્ષતુ ॥ ૨॥
શ્રીં બીજં સ્કન્ધદેશં મે હસખ્ફ્રેં ભુજદ્વયમ્ ।
હકારઃ કણ્ઠદેશં મે સકારઃ ષોડશં દલમ્ ॥ ૩॥
ક્ષવર્ણસ્તદધઃ પાતુ લકારો હૃદયં મમ ।
વકારઃ પૃષ્ઠદેશઞ્ચ રકારો દક્ષપાર્શ્વકમ્ ॥ ૪॥
યૂઙ્કારો વામપાર્શ્વઞ્ચ સકારો મેરુમેવ ચ ।
હકારો મે દક્ષભુજં ક્ષકારો વામહસ્તકમ્ ॥ ૫॥

મકારશ્ચાઙ્ગુલીં પાતુ લકારો મે નખં વતુ ।
વકારો મે નિતમ્બઞ્ચ રકારો જઠરં વતુ ॥ ૬॥

ષીઙ્કારઃ પાદયુગલં હેસૌઃ સર્વાઙ્ગં મેઽવતુ ।
હેસૌર્લિઙ્ગઞ્ચ લોમાનિ કેશઞ્ચ પરિરક્ષતુ ॥ ૭॥
ઐં બીજં પાતુ પૂર્વે મે હ્રીં બીજં દક્ષિણેઽવતુ ।
શ્રીં બીજં પશ્ચિમે પાતુ ઉત્તરે ભૂતસમ્ભવમ્ ॥ ૮॥
શ્રીં પાતુ ચાગ્નિકોણે ચ વેદાખ્યા નૈરૃતેઽવતુ ।
દેવામ્બા પાતુ વાયવ્યાં શમ્ભૌ શ્રીપાદુકાં તથા ॥ ૯॥
પૂજયામિ તથા ચોર્દ્ધ્વં નમશ્ચાધઃ સદાઽવતુ ।
ઇતિ તે કથિતં કાન્તે ! કવચં પરમાદ્ભુતમ્ ॥ ૧૦॥
ગુરુમન્ત્રં જપિત્વા તુ કવચં પ્રકઠેદ્યદિ ।
સસિદ્ધઃ સગણઃ સોઽપિ શિવ એવ ન સંશયઃ ॥ ૧૧॥
પૂજાકાલે પઠેદ્ યસ્તુ કવચં મન્ત્રવિગ્રહમ્ ।
પૂજાફલં ભવેત્તસ્ય સત્યં સત્યં સુરેશ્વરિ ! ॥ ૧૨॥
ત્રિસન્ધ્યં યઃ પઠેદ્દેવિ ! સ સિદ્ધો નાત્ર સંશયઃ ।
ભૂર્જે વિલિખ્ય ગુલિકાં સ્વર્ણસ્થાં ધારયેદ્ યદિ ॥ ૧૩॥
તસ્ય દર્શનમાત્રેણ વાદિનો નિષ્પ્રભાં ગતાઃ ।
વિવાદે જયમાપ્નોતિ રણે ચ નિરૃતેઃ સમઃ ॥ ૧૪॥

સભાયાં જયમાપ્નોતિ મમ તુલ્યો ન સંશયઃ ।
સહસ્રારે ભાવયન્ યસ્ત્રિસન્ધ્યં પ્રપઠેદ્ યદિ ॥ ૧૫॥
સ એવ સિદ્ધો લોકેશો નિર્વાણપદમીયતે ।
સમસ્તમઙ્ગલં નામ કવચં પરમાદ્ભુતમ્ ॥ ૧૬॥
યસ્મૈ કસ્મૈ ન દાતવ્યં ન પ્રકાશ્યં કદાચન ।
દેયં શિષ્યાય શાન્તાય ચાન્યથા પતનં ભવેત્ ॥ ૧૭॥
અભક્તેભ્યશ્ચ દેવેશિ ! પુત્રેભ્યોઽપિ ન દર્શયેત્ ।
ઇદં કવચમજ્ઞાત્વા દશવિદ્યાશ્ચ યો જપેત્ ॥ ૧૮॥
સ નાપ્નોતિ ફલં તસ્ય ચાન્તે ચ નરકં વ્રજેત્ ।
સમાપ્તં કવચં દેવિ ! કિમન્યત્ શ્રોતુમિચ્છસિ ।
તવ સ્નેહાનુબન્ધેન કિં મયા ન પ્રકાશિતમ્ ॥ ૧૯॥

॥ ઇતિ માતૃકાભેદતન્ત્રે સ્ત્રીગુરુકવચં સમાપ્તમ્ ॥

---

॥ અથ સ્ત્રીગુરુગીતા । કઙ્કાલમાલિનીતન્ત્રે દ્વિતીયપટલે ॥

પાર્વત્યુવાચ ॥
લોકેશ ! કથ્યતાં દેવ ! ગુરુગીતા મયિ પ્રભો ! ।

શ્રીભગવાનુવાચ ॥
શ‍ૃણુ તારિણિ ! વક્ષ્યામિ ગીતાં બ્રહ્મમયીં પરામ્ ।
ગુરુસ્ત્વં સર્વશાસ્ત્રાણામહમેવ પ્રકાશકઃ ॥ ૧॥
ત્વમેવ ગુરુરૂપેણ લોકાનાં ત્રાણકારિણી ।
ગયા ગઙ્ગા કાશિકા ચ ત્વમેવ સકલં જગત્ ॥ ૨॥
કાવેરી યમુના રેવા કરતોયા સરસ્વતી ।
ગોમતી ચન્દ્રભાગા ચ ત્વમેવ કુલપાલિકે ! ॥ ૩॥
બ્રહ્માણ્ડં સકલં દેવિ ! કોટિબ્રહ્માણ્ડમેવ ચ ।
ન હિ તે વક્તુમર્હામિ ક્રિયાજાલં મહેશ્વરિ ! ॥ ૪॥
ઉક્ત્વા ચોક્ત્વા ભાવયિત્વા ભિક્ષુકોઽહં નગાત્મજે ! ।
કથં ત્વં જનની ભૂત્વા બધૂસ્ત્વં મમ દેહિનામ્ ॥ ૫॥
તવ ચક્રં મહેશાનિ ! અતીતં પરમાત્મનિ ।
ઇતિ તે કથિતા ગીતા ગુરુદેવસ્ય બ્રહ્મણઃ ॥ ૬॥
સઙ્ક્ષેપેણ મહેશાનિ ! પ્રભુરેવ ગુરુઃ સ્વયમ્ ।

જગત્ સમસ્તમાસ્થાય ગુરુસ્ત્વેકો હિ કેવલમ્ ॥ ૭॥
ઇતિ તં તોષયિત્વા ચ નુતિભિઃ સ્તુતિભિસ્તથા ।
નાનાવિધદ્રવ્યદાનૈઃ સિદ્ધઃ સ્યાત્ સાધકોત્તમઃ ॥ ૮॥

॥ ઇતિ સ્ત્રીગુરુગીતા સમાપ્તા ॥

http://muktalib5.org

Proofread byDPD

*Striguru Dhyanam Stuti Kavacha and Gita from various tantras*

pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*